শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে কিষ্কিন্ধাকাণ্ডে

# ॥ ষষ্টিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ষষ্টিতমঃ সর্গঃ ॥

## সম্পাতেরাত্মকথা

ততঃ কৃতোদকং স্নাতং তং গৃধ্রং হরিযূথপাঃ।
উপৱিষ্টা গিরৌ রম্যে পরিৱার্য সমন্ততঃ ॥ **4.60.1** ॥

তমঙ্গদমুপাসীনং তৈঃ সর্ৱৈর্হরিভির্ৱৃতম্।
জনিতপ্রত্যযো হর্ষাৎ সম্পাতিঃ পুনরব্রৱীৎ ॥ **4.60.2** ॥

কৃৎৱা নিঃশব্দমেকাগ্রাঃ শৃণ্ৱন্তু হরযো মম।
তথ্যং সঙ্কীর্তযিষ্যামি যথা জানামি মৈথিলীম্ ॥ **4.60.3** ॥

অস্য ৱিন্ধ্যস্য শিখরে পতিতোঽস্মি পুরানঘ।
সূর্যতাপপরীতাঙ্গো নির্দগ্ধঃ সূর্যরশ্মিভিঃ ॥ **4.60.4** ॥

লব্ধসংজ্ঞস্তু ষড্রাত্রাদ্ ৱিৱশো ৱিহ্ৱলন্নিৱ।
ৱীক্ষমাণো দিশঃ সর্ৱা নাভিজানামি কিঞ্চন ॥ **4.60.5** ॥

ততস্তু সাগরাঞ্শৈলান্ নদীঃ সর্ৱাঃ সরাংসি চ।
ৱনানি চ প্রদেশাংশ্চ নিরীক্ষ্য মতিরাগতা ॥ **4.60.6** ॥

হৃষ্টপক্ষিগণাকীর্ণঃ কন্দরোদরকূটৱান্।
দক্ষিণস্যোদধেস্তীরে ৱিন্ধ্যোঽযমিতি নিশ্চিতঃ ॥ **4.60.7** ॥

আসীচ্চাত্রাশ্রমং পুণ্যং সুরৈরপি সুপূজিতম্।
ঋষির্নিশাকরো নাম যস্মিন্নুগ্রতপাঽভৱৎ॥ **4.60.8** ॥

অষ্টৌ ৱর্ষসহস্রাণি তেনাস্মিন্নৃষিণা গিরৌ।
ৱসতো মম ধর্মজ্ঞে স্বর্গতে তু নিশাকরে॥ **4.60.9** ॥

অৱতীর্য চ ৱিন্ধ্যাগ্রাৎ কৃচ্ছ্রেণ ৱিষমাচ্ছনৈঃ।
তীক্ষ্ণদর্ভাং ৱসুমতীং দুঃখেন পুনরাগতঃ॥ **4.60.10** ॥

তমৃষিং দ্রষ্টুকামোঽস্মি দুঃখেনাভ্যাগতো ভৃশম্।
জটাযুষা মযা চৈৱ বহুশোঽধিগতো হি সঃ॥ **4.60.11** ॥

তস্যাশ্রমপদাভ্যাশে ৱৱুর্ৱাতাঃ সুগন্ধিনঃ।
ৱৃক্ষো নাপুষ্পিতঃ কশ্চিদফলো ৱা ন দৃশ্যতে॥ **4.60.12** ॥

উপেত্য চাশ্রমং পুণ্যং ৱৃক্ষমূলমুপাশ্রিতঃ।
দ্রষ্টুকামঃ প্রতীক্ষে চ ভগৱন্তং নিশাকরম্॥ **4.60.13** ॥

অথ পশ্যামি দূরস্থমৃষিং জ্ৱলিততেজসম্।
কৃতাভিষেকং দুর্ধর্ষমুপাৱৃত্তমুদঙ্মুখম্॥ **4.60.14** ॥

তমৃক্ষাঃ সৃমরা ৱ্যাঘ্রাঃ সিংহা নানাসরীসৃপাঃ।
পরিৱার্যোপগচ্ছন্তি দাতারং প্রাণিনো যথা॥ **4.60.15** ॥

ততঃ প্রাপ্তমৃষিং জ্ঞাৎৱা তানি সত্ত্বানি ৱৈ যযুঃ।
প্রৱিষ্টে রাজনি যথা সর্ৱং সামাত্যকং বলম্॥ **4.60.16** ॥

ঋষিস্তু দৃষ্টৱা মাং তুষ্টঃ প্রৱিষ্টশ্চাশ্রমং পুনঃ।
মুহূর্তমাত্রান্নির্গম্য ততঃ কার্যমপৃচ্ছত॥ **4.60.17** ॥

সৌম্য ৱৈকল্যতাং দৃষ্টৱা রোম্ণাং তে নাৱগম্যতে।
অগ্নিদগ্ধাৱিমৌ পক্ষৌ প্রাণাশ্চাপি শরীরকে॥ **4.60.18** ॥

গৃধ্রৌ দ্বৌ দৃষ্টপূর্ৱৌ মে মাতরিশ্ৱসমৌ জৱে।
গৃধ্রাণাং চৈৱ রাজানৌ ভ্রাতরৌ কামরূপিণৌ॥ **4.60.19** ॥

জ্যেষ্ঠোঽহৱিতস্ত্ৱং সম্পাতে জটাযুরনুজস্তৱ।
মানুষং রূপমাস্থায গৃহ্ণীতাং চরণৌ মম॥ **4.60.20** ॥

কিং তে ৱ্যাধিসমুত্থানং পক্ষযোঃ পতনং কথম্।
দণ্ডো ৱাযং ধৃতঃ কেন সর্ৱমাখ্যাহি পৃচ্ছতঃ॥ **4.60.21** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
কিষ্কিন্ধাকাণ্ডে ষষ্টিতমঃ সর্গঃ ॥